योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ०९

नवमः सर्गः ९

श्रीवसिष्ठ उवाच ।

इति चिन्तयतस्तस्य शुक्रस्य पितुरग्रतः ।

जगामातितरां कालो बहुसंवत्सरात्मकः ।। १

अथ कालेन महता पवनातपजर्जरः ।

कायस्तस्य पपातोर्व्यां छिन्नमूल इव द्रुमः ।। २

मनस्तु चञ्चलाभोगं तासु तासु दशासु च ।

बभ्रामातिविचित्रासु वनराजिष्विवैणकः ।। ३

भ्रान्तमुद्भ्रान्तमभितश्चक्रार्पितमिवाकुलम् ।

मनस्तस्य विशश्राम समङ्गासरितस्तटे ।। ४

अनन्तवृत्तान्तघनां पेलवां सुदृढामपि ।

तां संसृतिदशां शुक्रो विदेहोऽनुभवन्स्थितः ।। ५

मन्दराचलसानुस्था सा तनुस्तस्य धीमतः ।

तापप्रसरसंशुष्का चर्मशेषा बभूव ह ।। ६

शरीररन्ध्रप्रवहद्वातसीत्काररूपया ।

चेष्टा दुःखक्षयानन्दात्काकल्येव प्रगायति ।। ७

मनोवराकमवटे लुठितं भवभूमिषु ।

हसतीवेति शुभ्राभ्रसितया दन्तमालया ।। ८

दर्शयन्ती जगच्छून्यं वपुरक्ष्णोरकृत्रिमम् ।

मुखारण्यजरत्कूपरूपया गर्तशोभया ।। ९

तापोपतप्ता संसिक्ता वर्षाजलभरेण सा ।

प्रागनुस्मरणोल्लासमिव वाष्पं विमुञ्चति ।। १०

चन्द्रानिलविलासेन लुलिता वनभूमिषु ।

धारानिकरपातेन विनुन्ना जलदागमे ।। ११

प्रावृण्निर्झररूपेण प्लुता गिरिनदीतटे ।

पांशुना पवनोत्थेन दुष्कृतेनेव रूषिता ।। १२

शुष्ककाष्ठवदालोला वातेषु कृतखाकृतिः ।

तारमारुतसीत्कारे वने तप इवास्थिता ।। १३

वक्रा शुष्कान्त्रतन्त्री च भूतभाङ्कारकारिणी ।

अरण्यलक्ष्मीर्बाल्येव शून्या चर्ममयोदरी ।। १४

रागद्वेषविहीनत्वात्तस्य पुण्याश्रमस्य तु ।

महातपस्त्वाच्च भृगोर्न भुक्ता मृगपक्षिभिः ।। १५

यमनियमकृशीकृताङ्गयष्टि-

श्चरति तपः स्म भृगूद्वहस्य चेतः ।

तनुरथ पवनापनीतरक्ता

चिरमलुठन्महतीषु सा शिलासु ।। १६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे भा० भार्गवकलेवरवर्णनं नाम नवमः सर्गः ।। ९ ।।